श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ अष्टादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टादशः सर्गः ॥

## समागतान् भूपालानृष्यश्रृङ्गं च विसर्ज्य सपत्नीकस्य राज्ञः स्वपुर्यामागमनं श्रीरामभरतलक्ष्मणशत्रुघ्नानां जन्मसंस्कारशीलगुणानां च वर्णनं, राज्ञः सभायां विश्वामित्रस्यागमनं सत्कारश्च

निर्वृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः।
प्रतिगृह्यामरा भागान् प्रतिजग्मुर्यथागतम्॥ **1.18.1** ॥

समाप्तदीक्षानियमः पत्नीगणसमन्वितः।
प्रविवेश पुरीं राजा सभृत्यबलवाहनः॥ **1.18.2** ॥

यथार्हं पूजितास्तेन राज्ञा च पृथिवीश्वराः।
मुदिताः प्रययुर्देशान् प्रणम्य मुनिपुङ्गवम्॥ **1.18.3** ॥

श्रीमतां गच्छतां तेषां स्वगृहाणि पुरात् ततः।
बलानि राज्ञां शुभ्राणि प्रहृष्टानि चकाशिरे॥ **1.18.4** ॥

गतेषु पृथिवीशेषु राजा दशरथः पुनः।
प्रविवेश पुरीं श्रीमान् पुरस्कृत्य द्विजोत्तमान्॥ **1.18.5** ॥

शान्तया प्रययौ सार्धमृष्यश्रृङ्गः सुपूजितः।
अन्वीयमानो राज्ञाऽथ सानुयात्रेण धीमता॥ **1.18.6** ॥

एवं विसृज्य तान् सर्वान् राजा सम्पूर्णमानसः।
उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन्॥ **1.18.7** ॥

ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः।
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥ **1.18.8** ॥

नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु।
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥ **1.18.9** ॥

प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम्।
कौसल्याजनयद् रामं दिव्यलक्षणसंयुतम् ॥ **1.18.10** ॥

विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकुनन्दनम्।
लोहिताक्षं महाबाहुं रक्तोष्ठं दुन्दुभिस्वनम् ॥ **1.18.11** ॥

कौसल्या शुशुभे तेन पुत्रेणामिततेजसा।
यथा वरेण देवानामदितिर्वज्रपाणिना ॥ **1.18.12** ॥

भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः।
साक्षाद् विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥ **1.18.13** ॥

अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत् सुतौ।
वीरौ सर्वास्त्रकुशलौ विष्णोरर्धसमन्वितौ ॥ **1.18.14** ॥

पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः।
सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥ **1.18.15** ॥

राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक्।
गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ **1.18.16** ॥

जगुः कलं च गन्धर्वा ननृतुश्चाप्सरोगणाः।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खात् पतत् ॥ **1.18.17** ॥

उत्सवश्च महानासीदयोध्यायां जनाकुलः।
रथ्याश्च जनसम्बाधा नटनर्तकसङ्कुलाः ॥ **1.18.18** ॥

गायनैश्च विराविण्यो वादनैश्च तथापरैः।
विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः॥ **1.18.19** ॥

प्रदेयांश्च ददौ राजा सूतमागधवन्दिनाम्।
ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः॥ **1.18.20** ॥

अतीत्यैकादशाहं तु नामकर्म तथाकरोत्।
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम्॥ **1.18.21** ॥

सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा।
वसिष्ठः परमप्रीतो नामानि कुरुते तदा॥ **1.18.22** ॥

ब्राह्मणान् भोजयामास पौरजानपदानपि।
अददद् ब्राह्मणानां च रत्नौघममलं बहु॥ **1.18.23** ॥

तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत्।
तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः॥ **1.18.24** ॥

बभूव भूयो भूतानां स्वयम्भूरिव सम्मतः।
सर्वे वेदविदः शूराः सर्वे लोकहिते रताः॥ **1.18.25** ॥

सर्वे ज्ञानोपसम्पन्नाः सर्वे समुदिता गुणैः।
तेषामपि महातेजा रामः सत्यपराक्रमः॥ **1.18.26** ॥

इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः।
गजस्कन्धेऽश्वपृष्ठे च रथचर्यासु सम्मतः॥ **1.18.27** ॥

धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः।
बाल्यात् प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः॥ **1.18.28** ॥

रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः।
सर्वप्रियकरस्तस्य रामस्यापि शरीरतः॥ **1.18.29** ॥

लक्ष्मणो लक्ष्मिसम्पन्नो बहिःप्राण इवापरः।
न च तेन विना निद्रां लभते पुरुषोत्तमः ॥ **1.18.30** ॥

मृष्टमन्नमुपानीतमश्नाति न हि तं विना।
यदा हि हयमारूढो मृगयां याति राघवः ॥ **1.18.31** ॥

अथैनं पृष्ठतोऽभ्येति सधनुः परिपालयन्।
भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ॥ **1.18.32** ॥

प्राणैः प्रियतरो नित्यं तस्य चासीत् तथा प्रियः।
स चतुर्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ॥ **1.18.33** ॥

बभूव परमप्रीतो देवैरिव पितामहः।
ते यदा ज्ञानसम्पन्नाः सर्वे समुदिता गुणैः ॥ **1.18.34** ॥

ह्रीमन्तः कीर्तिमन्तश्च सर्वज्ञा दीर्घदर्शिनः।
तेषामेवम्प्रभावाणां सर्वेषां दीप्ततेजसाम् ॥ **1.18.35** ॥

पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा।
ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः ॥ **1.18.36** ॥

पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः।
अथ राजा दशरथस्तेषां दारक्रियां प्रति ॥ **1.18.37** ॥

चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः।
तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ॥ **1.18.38** ॥

अभ्यागच्छन्महातेजा विश्वामित्रो महामुनिः।
स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षानुवाच ह ॥ **1.18.39** ॥

शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः सुतम्।
तच्छ्रुत्वा वचनं तस्य राज्ञो वेश्म प्रदुद्रुवुः ॥ **1.18.40** ॥

सम्भ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः।
ते गत्वा राजभवनं विश्वामित्रमृषिं तदा॥ **1.18.41** ॥

प्राप्तमावेदयामासुर्नृपायेक्ष्वाकवे तदा।
तेषां तद् वचनं श्रुत्वा सपुरोधाः समाहितः॥ **1.18.42** ॥

प्रत्युज्जगाम संहृष्टो ब्रह्माणमिव वासवः।
स दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम्॥ **1.18.43** ॥

प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत्।
स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा॥ **1.18.44** ॥

कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम्।
पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च॥ **1.18.45** ॥

कुशलं कौशिको राज्ञः पर्यपृच्छत् सुधार्मिकः।
अपि ते सन्नताः सर्वे सामन्तरिपवो जिताः॥ **1.18.46** ॥

दैवं च मानुषं चैव कर्म ते साध्वनुष्ठितम्।
वसिष्ठं च समागम्य कुशलं मुनिपुङ्गवः॥ **1.18.47** ॥

ऋषींश्च तान् यथान्यायं महाभाग उवाच ह।
ते सर्वे हृष्टमनसस्तस्य राज्ञो निवेशनम्॥ **1.18.48** ॥

विविशुः पूजितास्तेन निषेदुश्च यथार्हतः।
अथ हृष्टमना राजा विश्वामित्रं महामुनिम्॥ **1.18.49** ॥

उवाच परमोदारो हृष्टस्तमभिपूजयन्।
यथामृतस्य सम्प्राप्तिर्यथा वर्षमनूदके॥ **1.18.50** ॥

यथा सदृशदारेषु पुत्रजन्माप्रजस्य वै।
प्रणष्टस्य यथा लाभो यथा हर्षो महोदयः॥ **1.18.51** ॥

तथैवागमनं मन्ये स्वागतं ते महामुने।
कं च ते परमं कामं करोमि किमु हर्षितः॥ **1.18.52**॥

पात्रभूतोऽसि मे ब्रह्मन् दिष्ट्या प्राप्तोऽसि मानद।
अद्य मे सफलं जन्म जीवितं च सुजीवितम्॥ **1.18.53**॥

यस्माद् विप्रेन्द्रमद्राक्षं सुप्रभाता निशा मम।
पूर्व राजर्षिशब्देन तपसा द्योतितप्रभः॥ **1.18.54**॥

ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि बहुधा मया।
तदद्भुतमभूद् विप्र पवित्रं परमं मम॥ **1.18.55**॥

शुभक्षेत्रगतश्चाहं तव सन्दर्शनात् प्रभो।
ब्रूहि यत् प्रार्थितं तुभ्यं कार्यमागमनं प्रति॥ **1.18.56**॥

इच्छाम्यनुगृहीतोऽहं त्वदर्थं परिवृद्धये।
कार्यस्य न विमर्शं च गन्तुमर्हसि सुव्रत॥ **1.18.57**॥

कर्ता चाहमशेषेण दैवतं हि भवान् मम।
मम चायमनुप्राप्तो महानभ्युदयो द्विज।
तवागमनजः कृत्स्नो धर्मश्चानुत्तमो द्विज॥ **1.18.58**॥

इति हृदयसुखं निशम्य वाक्यं
श्रुतिसुखमात्मवता विनीतमुक्तम्।
प्रथितगुणयशा गुणैर्विशिष्टः
परमऋषिः परमं जगाम हर्षम्॥ **1.18.59**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टादशः सर्गः॥